भृष्टं हिङ्गु च जीरकद्वययुतं सर्व्वार्द्धभागान्वितं
खादेद्दङ्गमितं प्रवृत्तिगदवांस्तक्रस्य विल्वेन च॥
लघुनायिकाचूर्णमित्यर्थः॥ इति लघुलाईचूर्णम्॥
त्रिकटु त्रिफला चैव विड़ङ्गं जीरकद्वयम्।
भल्लातकं यवानी च हिङ्गुलवणपञ्चकम्॥
गृहधूमो वचा कुष्ठं रसो गन्धकमभ्रकम्॥
क्षारत्रयाजमोदे च चित्रकं गजपिप्पली॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम्।
समभागकृतञ्चैषां चूर्णं श्लक्ष्णं विनिर्म्मितम्॥
शक्राशनस्य चर्णन्तु चूर्णतुल्यं प्रदापयेत्।
मन्दाग्निकासदुर्नामप्लीहपाण्डुरुचिज्वरान्॥
विष्टम्भं संग्रहं शूलं हन्यान्नानातिसारजित्
आमवातापहं वल्यं सूतिकादोषनाशनम्॥
वर्ज्जयेन्मैथुनञ्च स्नानं पिशितभोजनम्।
पथ्यं काञ्जिकमत्रापि दधितक्रमथापि वा॥
बृहल्लाईचूर्णमिदं लाईभाषितमुत्तमम्॥”
इति वृहल्लाईचर्णम्। बृहन्नायिकाचूर्णमिति
प्रसिद्धम्॥ * ॥
“जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः॥
तालीशपिप्पलीपथ्यास्थूलजीरकचित्रकैः।
शुण्ठीविड़ङ्गमरिचैः समभागविचूर्णितैः॥
यावन्त्येतानि सर्व्वाणि दद्याद्भङ्गाञ्च तावतीम्।
सर्व्वचूर्णसमानांशा प्रदेया शुभ्रशर्करा॥
कर्षमात्रमिदं खादेन्मधुना प्लावितं जनः।
नाशयेद्ग्रहणीं कासं क्षयं श्वासमरोचकम्॥”
इति जातीफलादिचूर्णम्॥*॥
चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम्।
व्योषं हिङ्ग्वजमोदाञ्च चव्यञ्चैकत्र चूर्णयेत्॥
वटिका मातुलुङ्गस्य रसैर्वा दाड़िमस्य वा।
कृता विपाचयत्यामं प्रदीपयति चानलम्॥
क्षारौ सर्जिका यवक्षारश्च। लवणपञ्चकमिति।
“सैन्धवं रुचकञ्चैव विड़ं सामुद्रकं गड़म्॥”इति॥
व्योषं शुण्ठीपिप्पलीमरिचानि। अजमोदात्र
यवानिका। मातुलुङ्ग बीजपूरकम्। इति चित्र-
कादिवटिका॥*॥
“श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः
सगुड़ः।
ग्रहणीगदमत्युग्रं तक्रभुजाशीलितो जयति॥”
श्रीफलशलाटुः विल्वस्यामं फलम्। गुड़स्यात्र
भागद्वयम्। इति विल्वकल्कः॥ * ॥
“चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम्।
वार्त्ताकोः कुड़वञ्चार्कमूलाद्विल्वे तथानलात्
दग्ध्वा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम्॥
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम्॥
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम्॥”
इति वार्त्ताकुगुटिका॥*॥
“मुस्तकातिविषाविल्वकौटजं सूक्ष्मचूर्णितम्।
मधुना च समालीढ़ं ग्रहणीं सर्व्वजां त्यजेत्॥”
कौटजं इन्द्रयवः। मुस्तकादिचूर्णम्॥*॥
“श्वेतो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः।
गुड़ेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति॥”
सर्ज्जः रालः। सर्ज्जरसचूर्णम्॥ * ॥
“विल्वाब्दशक्रयवबालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयेण।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति॥”
मोचो मोचरसः। क्षिणोति हन्ति॥*॥
“प्रस्थत्रये त्वामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुड़स्य।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषेभकृष्णाहवुषाजमोदैः॥
विड़ङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत्॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम्।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः॥
शाम्यन्ति चायं चिरमन्तरग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः॥
तैले मनाक् त्रिवृद्भृष्टा त्रिसुगन्धि पलं पलम्
सिद्धे निधेयमत्रैव गुड़े कल्याणपूर्व्वके॥”
इति कल्याणकगुड़ः॥*॥
“पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकञ्च विड़ङ्गानि यवानी-मरिचानि च॥
त्रिफला चाजमोदा च नलिनी जीरकस्तथा।
सैन्धवं रौमकञ्चापि सामुद्रं रुचकं विड़म्॥
आरग्वधश्च त्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका।
शुण्ठीशक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः॥
स्नुहीकायाः पलान्यत्र चत्वारि कथिता निहि।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृद्वग्निना पचेत्॥
औड़म्बरं चामलकं बादरं वा यथा फलम्।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम्॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम्
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम्॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं
स्वरम्।
पिचुपाठान्वयाद्धन्ति रक्तपित्तञ्च विड्ग्रहम्॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुड़ः॥”
इति महाकल्याणकगुड़ः॥*॥
कुष्माण्डानां सुपक्वानां स्विन्नानां निष्कुलत्वचाम्
सर्पिःप्रस्थे पलशतं ताम्रपात्रे शनैः पचेत्॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकानि विड़ङ्गानि नागरं मरिचानि च॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम्॥
एकैकस्य पलञ्चैकं त्रिवृतोऽष्टौ पलानि च।
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु॥
आमलक्या रसस्याद्द प्रस्थत्रयमुदीरितम्।
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक्
यावद्दर्व्वीप्रलेपः स्यात्तथैनमवतारयेत्।
औड़म्बरञ्चामलकं बादरं वा यथा फलम्
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम्।
अनेनैव विधानेन प्रयुक्तञ्च दिने दिने॥
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान्।
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः॥
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम्।
वातशोणितवीसर्पदद्रुयक्ष्महलीमकान्॥
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समा-
चरेत्।
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः॥
तेभ्यो हितो गुड़ोऽयं स्याद्वन्ध्यानामपि पुत्त्रदः
हृष्यो वल्यो वृंहणश्च वयसः स्थापनः परः॥”
इति कुष्माण्डकल्याणकगुड़ः॥*॥
अतीसाराधिकारलिखितं विल्वतैलञ्चात्र हि-
तम्। इति भावप्रकाशे ग्रहणीरोगाधिकारः॥
(चिकित्सान्तरमस्या यथा,—
“बालं विल्वं गुड़ं तैलं पिप्पली विश्वभेषजम्।
लिह्याद्वाते प्रतिहते सशूले सप्रवाहिके॥
पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः।
त्र्यहात् प्रवाहिकां हन्ति चिरकालानुबन्धि-
नीम्॥
कल्कः स्याद्बालविल्वानां तिलकल्कश्च तत्समः।
दध्नः सराम्लः सस्नेहाढ्यः खड़ो हन्यात् प्रवाहि-
काम्॥”
इति वैद्यकचक्रपाणिसंग्रहेऽतीसराधिकारे॥

प्रवाही, स्त्री, (प्रोह्यते इति। प्र+वह्+घञ्। गौरादित्वात् ङीष्) वालुका। इति राजनिर्घण्टः॥

प्रविख्यातिः, स्त्री, (प्र+वि+ख्या+क्तिन्।) अतिप्रसिद्धिः। तत्पर्य्यायः विश्रावः २। इत्यमरः। ३। २। २८॥

प्रविदारणं, क्ली, (प्रविदारयन्त्यत्रेति। प्र+वि+दृ+णिच्+आधारे ल्युट्।) युद्धम्। इत्यमरः। २।८।१०३॥ (प्र+वि+दृ+णिच्+भावे ल्युट्।) अवदारणम्। इति मेदिनी। णे,११३॥ आकीर्णम्। इति शब्दरत्नावली॥ (प्र+वि+दृ+णिच्+कर्त्तरि ल्युः। प्रविदारके, त्रि॥)

प्रविरः, पुं, पीतकाष्ठम् इति। शब्दचन्द्रिका॥

प्रविश्लेषः, पुं, (प्रकृष्टो विश्लेषो यस्य।) प्रकृष्ट-विश्लेषः। तत्पर्य्यायः। विधुरम् २। इत्यमरः। ३। २। १०॥ यथा,—
“वैक्लव्येऽपि प्रविश्लेषे विधुरं विकले त्रिषु॥”
इति भरतधृतत्रिकाण्ड शेषः॥

प्रविषा, स्त्री, (प्रहतं विषमनया।) अतिविषा। इति क्वचिदमरे। २। ४। ९९॥ (अतिविषा-शब्देऽस्य विवरणं ज्ञातव्यम्॥)

प्रविष्टः, त्रि, (प्र+विश्+कर्त्तरि क्तः।) प्रवेश-विशिष्टः। यथा,—